मेव एवं चेद्ध्रुवोदासीनयोः संग्रहार्थेन पाशुक्तमित्यपाव एप कमेवेति अकथितं च केनाकथि
तमित्याकांक्षायामाह अपादानादिविशेषैरिति अपादानादिविशेषाविवक्षितानां तु गो दोग्धि पयः
बलेयाचते वसुधां व्रजेऽवरुणद्धि गामित्येवं चस्यादयमेवं भवतीति भावः एतेन पाणिनिना।
कं सपाद्यं दोग्धीत्यत्र करणाधिकरणयोरतिप्रसंगस्तयोस्तु दंडेन करोति कटे तिष्ठतीत्यादिर
वकाशस्तु दुह्यादिपरिगणनादित्याक्षेपो निरस्तः करणाधिकरणसंज्ञयोरिह विवक्षितत्वात् य
दि तु सूत्रेऽकथितशब्दोऽप्रधानपर्यायः तत्वनुक्तपर्याय इत्यभ्युपगम्येत तदा स्यादेवायमा
क्षेपो न त्वन्यथा कारकमिति ततश्च ग्रामस्य पुत्रं पृच्छतीत्यत्र नातिप्रसंगः दुह्यादीति
दंड दंडनिपातने चुरादिः इदन्तु दंडिग्रहणार्थं नतु निग्रहार्थः गृहीत्वागां तकेनेकारान्ति
देशो नाद्विका ग्रहिज्येति संप्रसारणप्रसंगात् कर्मयुगिति कर्मणा युज्यते कर्मयुक् स
त्साह्वित्यादिना क्विप् कर्मणा यद्युज्यत इति मुख्यकर्मणा सह क्रियया संबध्यमानं
कारकमेवापादानादिविशेषैरकथितं सत्कर्मसंज्ञकं भवतीत्यर्थः एतेन दुह्यादीनां

अं सं पु ५५

अपादानमधि
करणं कर्म कर
णं कर्ता हेतुरि
त्येतेति शेषैरि
त्यर्थः अविव
क्षितमिति २

न संयोगादिकं कालाधारत्वान्नैयायिकानां स्वीकृतमस्य लक्षणादेरिति भावः। इह हि स्यामं गन्धलक्षणस्पर्शानां
न स्पर्शवत्वं लक्षणस्यानोस्वीकृतत्वात् यदा लक्षण [illegible] मीस्वीकृततमं भवति तदा पूर्वे लोवस्सिद्धं ३ वेदं यच
नोवेदनाबुद्धिविषयः न हि कूलं कथनीत्यचेतनेनेन दर्शं भवान् किं तु दक्षे प्राह अवोरभावलक्षणे
स्यामिति विवेचनं विवमिति अत्र विशेषे ष्यामव्यादेन [illegible] वद्गुजिनासंबंधाल्लक्ष
णे न तत्र वलए वद्गुरु वो व्याधव्यादिनावी अमानो मरणमेव अस्मा येन स्यात्तस्यावि षमीस्वीकृतमेव यो
षित्वां स्यात् ते न तस्यापि गुडादिवद्गुधमाध्ववसीयमानं विषमीस्वीकृततमेव कथमन्यथा प्रवर्त्ते
त तस्मादिदमुदाहरणमयुक्तमेवेति चेन्न अत्राहुः यदा कश्चिन्मरणकातरो विषेरिणापि
तद्यमाणो विषं भक्षये नेदममुदाहरणमिति अनीप्सितस्य लोकस्य बहुप्रतिपन्नत्वं तथा भुक्तमि
त्यारंभादेवेष्टसिद्धेः स्यादेतत् धातुयस्याप्यपस्तो लाभ्युर्यः कर्मत्वं वास्तु किमनेन कर्तुरीप्सि
तमित्यादिसूत्रद्वयकथनेनेति चेन्न अत्राहुः अग्ने मीणवकं वृष्यनीत्यत्र वारणार्थानामी
प्सित इति सूत्रेण माणवकस्यापादानत्वे प्राप्ते तद्बाधाय कर्तुरीप्सिततममिति सूत्रम्

तम

मासुके बालमादाय: पुन: वस्तनातनाडनं कुवनतं दं निद्रानिलेनरं मेषग्रहः संक्रमते ततः स
ज्वरवान् भवेत् वायुकोपः सर्वगात्रे नेत्रवान् मीलितेन तथा फेनिलास्येन मोहस्थिरेकम्पमंगवे
ष्टितः पाणिपादमहं पीचजायते नत्रयणांतच्चौषधंस्तुवे हिरण्यं श्वेतवस्त्रंच पायसं मत्स्य वल्लया
ज्वालानाम्नायमपि नित्यं तत्तु लिः पूर्णांगुष्ठेपि वा गंधाद्यैर्ग्रहम भ्यर्च्य शास्त्रपाणिनिर्णयके मंत्रेण
वक्ष्यमाणेन पूर्वोक्तेन बलिं हरेत् पूर्वोक्तं चेत्यनेन स्कंदग्रहहरे सूत्रे मेषग्रहग्रस्तस्य तद्दो

च षस्यं शांतये हिरण्यं श्वेतवस्त्रं चेत्यादिना बलिर्देयः मेषग्रहो हेयेन बलिमंत्रमाह प्रग्रही
षबलिं चेमं मेषग्रह मनग्रह मात्तरसमस्वाहा सिद्धिं प्रयच्छ नेम हावले इति मेषग्रहहरं सूत्र
स्कंदग्रहहरं कर्मविपाकसंग्रहे बालग्रहपतने बालमादायाक्लिष्टमकुस्तयी मग्निस्फालो
स्कंदाख्यग्रहः संक्रमते गतः पादयोर्हस्तयोश्च वविकारो वा पुंजाः भवेत् बलिप्रकारमाह तिल
पिष्टदधिक्षीरं कृसरापूपमत्स्यकवः राजमाषाश्च मुद्गाश्च निष्पावाष्टकेदम्लकं पूर्वोक्तमासमूराचेति
पूर्णकुंभ पुनोबलिः तिलपिष्टादिकं कांस्यपात्रेकृत्वा परिवेष्टयेत् वस्त्रद्वयेन कलशं रक्तसूत्रेणैव

स.ह.
१९

हि कचिद्वगुणापतनेकं क्रमादिरसैः शुभैः चतुरस्रं चतुर्हस्तं मंडलं परिकल्पयेत् तत्र दद्याद्बलिं
मध्यरात्रे मध्येमयतः रक्तमाल्यांवरैस्कंदग्रहसमर्चयेत्ततः बलिमेत्रमाह बालाधीशस्कंदम
हत्रक्तमालांवरप्रियः प्रगृह्णीष्वबलिंचेमंसुजाभिःसहपुष्टिमत् बलिमेवंविधानेनदत्वाला
गत्वमंदिरं अग्निप्रतिष्ठाप्यततःस्वाहांतैःस्कंदस्वदेवताः यष्ट्वाक्षीयमंत्राभ्यांहविःतीराज्यसर्षि
पं द्रोणमात्रेनपक्वान्नेपक्वान्नमांसतथासवान् पक्वमांसदधितघ्नातिलपिष्टंचशोणिते हर
णंवबहिर्देघासदोषेहत्समूलके रक्तचंदनवस्त्रमूलवस्त्राद्यैःपरिसूत्रिते इतिस्कंदग्रहहरं
अथस्कंदापस्मारहरं कर्मविपाकसंग्रहे उन्मार्गज्ञकृतेयस्तुवद्विहामसूत्रपुरीषयोः ग्रहःसंक
मतेनैवस्कंदापस्मारसंज्ञकः ततोदंष्ट्रोत्पत्तिजिह्वीनयेनिलास्योपजायते अपस्मारीभवेत्तत्र
वंवहूलिमाहरेत् इतिस्कंदापस्मारहरं अथप्रकारांतरेणस्कंदग्रहहरं कर्मविपाकसंग्रहे
अग्रेःपरिसरेष्वेतेयोमूत्रंचिर्वालकैःसह स्कंदग्रहःप्रगृह्णातितेनततःपाणिपादयोः स्त्रावश्चवा
तजोदोषःप्रजायेतातिदारुणः बालकेरित्यत्रबहुवचनेमविवक्षितं तेनास्यत्राप्येकवचनम्

१०९

विवर्द्धिते अत्रच तस्मिंस्तेनैन यच्छ्रुतो नैयग्रबालकस्य घोरः पिपासमर्त्तः अत एव बलिदानमे।
त्रेषु षष्ठ्यां विकारान् मंत्रेणादीनि लिंगानि हव्यं नैयन्नकुत्र योनिर्मंसेवे यावद्यः यो नैवोपि
लभ्यतत्रुलिम हावर्णाव: प्रतीकारमाह नवदलस्मिं नेहमना स्थंडिले चन्न रक्तकोणऊपलिप्य
मेवन चूर्णैः खलिकाराति विन्यसेत् द्वाराणि तत्र चत्वारि चतुर्दिक्षु प्रकल्पयेत् तेषु पात्रिं चैपा
पीच मसले तोमरं लिखेत् मध्ये दष्टदले पद्मं लिखित्वा तदनन्तरं चतुष्कोण विन्यस्य शर्णेकुंभ
तु समाहितः मध्ये नव बलिं दद्यात् स्कंदग्रह विमुक्तये बलिद्रव्यस्वरूपादिकं दर्शयति कसरान्नं च
पिष्टं चतीरं दधि घृतं मधुः अपूपं मत्स्यं वाम् मुद्गानि धान्यानि राजमाषकाः चणकाश्च मसूराश्च
रामांसं लवणं च रक्तं कुकुटं संयुक्तं छत्रे मेषाणि विहिते रक्तवस्त्रं चत्वारकान्नं रक्तचंदनमेव च
रक्तपुष्पाणि धूपाश्चपूर्णाः कुंभस्कोचनः अन्यानि यानि वस्त्राणि शिशुक्रोडनदेवतः एतत्।
सर्वं कदेवस्य महलेवाभ्रंदमूलके स्कंदस्य भवने वापि मंत्रेणानेन निर्दिशेत् अत्रकदंबमूलद
षुबलिदानम् तथा बालमारायणायान्मिति विधिष्टवाकाः स्यापि बलिमाहरेदित्युक्तेनत्रकः।

क.वि.
१२३

शमित्याकान्तामाह मेषकुक्कुटमांसं च पायसं ससितं वस्त्रथा हविषं च हिरण्यं चैतेन स्करलेवदस्य
द्विः विनिक्षिपेद्दहोत्रे रक्तवस्त्रादिभिर्युते स्नात्वा वस्त्रा मालेन मंत्रेणानेन संयतः वलाधीशा
स्कंदमदंतकेभास्यावरप्रिय प्रगृह्णीष्व बलिं चेमं पूजाभिः सहदत्तमिमान् इति श्री भट्टनील
कंठात्मज भट्टशंकरकृते कर्मविपाकार्के यद्दृष्टान्ति अथ भस्मजयविधिः स वसिष्ठप्रोक्ते ध
वकस्य च मोदात्स्त्रं श्रोतुमिच्छामि मते विस्तरेण यथा तत्त्वं प्रसन्नो वक्तुमर्हसि एवं पृष्टः प्रसन्नात्मा ते
न त्यादस मदात्मनिः अहंना तपसा दृष्ट्वा मत्तमेजीवन्ती मया विधिं तस्य प्रवक्ष्यामि समाही
तमनाः शृणु अस्य मस्य ऋषिः प्रोक्तश्छंदोऽनुष्टुविहोच्यते देवता त्र्यंबको रुद्रः षडंगानि प्र
णष्टमा अथ येहृदयायेति नमोंते हृदये समन्ते मूर्द्धका यति शिरसे स्वाहांतं शिरसे न्यसेत् त्रिनेत्रा
य शिखायै वषडेवं च शिखायां स्पृशेत् वसिष्ठायेति कवचे हुमंते कवचे स्पृशन्ते नेत्रत्रयेति श्रीव
यायवौषडंतमदाहृते अस्त्रं पकंदसस्याय फडिन्यस्य मदाशान्ते प्राणायामं चतर्दिक्षु
दिग्बंधं कारयेत्क्रमात् एवं न्यस्य षडंगानि नामभिः षड्भिरेव च दुर्गां विनायकं चैव नंदी

त्प२ वत्र

सोऽप्योक्तेस्तु भयमपि चिदात्मन्यध्यस्तं ब्रह्मण एव विद्याविजृंभितमित्युक्तं भवति। नन्वन
योरविद्याकल्पितत्वे शुक्तिरजतादिवद्बाधः कदाचिदुपलभ्येत स नोपलभ्यते तस्मान्ना
विद्यामयत्वमित्याशंक्याह। अनादीति॥ जीवश्च जगच्चेतीदं द्वयमनादिकालमारभ्य मोक्षा
दविद्यानिवृत्तिरूपात्पूर्वमनुवर्त्तते तथा च यावदधिष्ठानसाक्षात्कारो नोदेति तावत्स्व
प्रवद्वाप्रबोधोदयं न बाध्यत इत्यर्थः॥३६॥ ननु यदीदं द्वयमनादि अनंतं चामोक्षात्तर्हि
कथं सृष्टिप्रलयश्रुतिस्मृतिवादाः। कथं च सुषुप्तिजागरावित्यत आह॥ चिदाभासे स्थिता
निद्रा विक्षेपावृतिरूपिणी। आवृत्य जीवजगती पूर्वे नूत्ने तु कल्पयेत्॥३७॥ चिदाभासे जी
वे स्थिता निद्रा अविद्या किंलक्षणा विक्षेपावृत्तिरूपिणी प्रागुक्तलक्षणा सा जीवजगती
पूर्वे प्रथमं सुषुप्तिप्रलययोरावृत्य प्रविलाप्य स्वात्मसात्कृत्वा पुनः प्रबोधसृष्ट्योर्नूत्ने
नूतनरूपेण कल्पयेत् पुनर्जीवजगद्व्यवहारं प्रवर्त्तयेदित्यर्थः। यो जनाः अविद्याक

दे। ध२

ग्यं च भूतभौतिकरूपं जगद्व्यावहारिकमुभयं सच्चिदानंदब्रह्मचैतन्यस्यानाद्यविद्याविच्छिन्नप्रमाणोक्तं ज्ञायमानमुपपादितं। अस्मिंस्तु श्लोके चिदाभासे स्थितानिद्रेति आवरणप्रधानाऽप्रत्यगविद्योच्यते तया स्वप्नकल्पितो जीवस्तद्भो ३

ल्पितस्य चिदाभासस्याविद्याश्रयत्वायोगाद्दृमजङ्गत्वविद्यायास्तस्मिन्नस्फुटतरावभा
समपेक्ष्य चिदाभासे स्थितानिद्रेत्युक्तमिति द्रष्टव्यं यदा पूर्वश्लोके चिदाभासो जीवस्तद्भो
ग्यं च जगत्प्रातिभासिकमुभयं प्रतिपादितमिति तात्पर्यार्थो द्रष्टव्यो व्याख्यातं ।३७। एत
योः कथं प्रातिभासिकत्वमित्यपेक्षायामाह ॥ प्रतीतिकाल एवैते स्थितत्वात्प्रातिभासिके ॥
न हि स्वप्नप्रबुद्धस्य पुनः स्वप्ने स्थितिस्तयोः ॥३८॥ एतेऽनंतरोक्ते जीवजगती प्रतीतिकाल ए
व प्रतिभाससमय एव न पुरस्तान्न पश्चात्स्थितत्वात्प्रातिभासिके उच्येते इत्यर्थः ॥ उक्तं
प्रतीतिकालमात्रसत्त्वमनुभवेनोपपादयति न हीति स्वप्नात्प्रबुद्धस्यावस्थांतरं गतस्य पु
सः पूर्वदृष्टयोस्तयोः पुनः स्वप्ननिवृत्त्युत्तरकालमपि न हि स्वप्ने स्थितिरस्ति तथादर्शनादे
वेत्यर्थः ॥ स्वप्नदृष्टस्यावस्थांतरे स्वप्नांतरे वा संवादाभावात्प्रतिभासकालमात्रतया सिद्धं
प्रातिभासिकत्वमिति भावः ॥३८॥ तदेवं जीवत्रयं विभज्य तत्र चिदाभासस्वप्नकल्पितयोर्जीवयोः

यमवाप्नुयात् वैरूप्यं मरणं चापि तस्मात्कार्यं प्रियं स्त्रियः दोहदं गर्भिणीप्रियं तच्चैवाश्वलायनः वपनं मैथुनं तीर्थं
वर्जयेत् गर्भिणीपतिः श्राद्धं च सप्तमान्मासादूर्ध्वं चान्यत्र वेदवित् श्राद्धं तद्भोजनमिति प्रयोगपारिजाते कालवि
धाने मुहूर्तदीपिकायां क्षुरं शवानुगमनं नखकृन्तनं च युद्धादिवास्तुकरणं त्वतिदूरयाने उद्वाहमौपनयनं जल
लधेश्च गाहमायुः क्षयार्थमिति गर्भिणीकापतिस्ता रत्नसंग्रहे गालवः उद्वाहं वपनं चैव चौलं वै गिरिरोहणं
नावश्चारोहणं चैव वर्जयेद्गर्भिणीपतिः अन्यत्रापि अपक्वगर्भो पतिरब्धियानं मृतस्य वाहं क्षुरकर्म संगं नस्या
त्र्यपत्ने नगयादितीर्थं यमादिकं वास्तुविधेन कुर्यात् व्यक्तगर्भा वनिता चेन्मासनवयात्यदोषणा सा त्वरतः स
तिनवमेरिष्टवासिनी अथ सूतिगृहप्रवेशः गर्गः रोहिण्यैन्दवपौष्णे पुष्यान्तौ वरुणयोरपि पुनर्वसुपुष्यह
स्तधनिष्ठास्तूत्तरासु वा मैत्रेन्त्वाष्ट्रेन पाश्विन्यां सूतिकागारवेशनं एतच्च संभवे प्रसूतिसंभवे काले सद्य
एव प्रवेशयेदिति वसिष्ठोक्तेः नक्षत्रे नैर्ऋत्यां कार्यं वारुण्यां भोजनगृहं नैर्ऋत्यां सूतिकागृहमिति वसिष्ठोक्तेः
विष्णुधर्मे दशाहं सूतिकागारं मातृधैष्ण्य विशेषतः वह्निनातिंदुकालातैः पूर्णकुम्भैः प्रदीपकैः मुसलेन त
था कारिवर्णकैश्चापि ते मता अथ जातकर्म पारिजाते वसिष्ठः श्रुत्वा जातं पिता पुत्रं सचेलं स्नानमाचरे
त् मनुः प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म विधीयते वर्द्धने छेदने हेमाद्रौ वैजवापः जन्मनोनन्तरं कार्यं जात
कर्म यथाविधि दैवादतीतकालं चेदतीते सूतके भवेत् पृथ्वीचन्द्रोदये विष्णुधर्मे आच्छिन्ननाभिकर्त्तव्या

ॐ

श्राद्धं वै पुत्रजन्मनि पुत्रपदेन कन्यापि गृह्यते न दाहनत्रैवकालीनिति: प्रादुर्भावः पुत्रपुत्र्योः ग्रहणे चन्द्रसूर्ययोः
स्नात्वानन्तरमात्मीयान्पितॄन्श्राद्धेन तर्पयेत् एतच्च रात्रावपि कार्यं पुत्रजन्मनि यात्रायां तीर्थे पर्वणि दत्तमक्षय्यमि
तितत्रैव व्यासोक्तेः वैजवापः जातकर्म कुमारस्य जातकर्म विधीयते स्तनप्राशनतः पूर्वं नाभिकर्तनतोपि वा रात्रे
ननैमित्तिकमपीदं जाते षष्ठिवदाशौचान्ते कार्यमिति त्रिकाण्डपरास्ता जाते कुमारे पितॄणां मामोदात्तु पुण्यं न दह रितिहा
रीतोक्तेश्च अत्र श्राद्धं आमेन हेम्ना वा कार्यमित्युक्तं पृथ्वीचन्द्रोदये आदित्यपुराणे जातश्राद्धे न दद्यात्तु पक्वान्नं
ब्राह्मणेष्वपीति हेमाद्रिस्तु पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान् न पक्वेन न चामेन कल्याणान्यभिकामं॰
यन्निति संवर्तोक्तेर्हेम्नैवेत्याह तच्च जननाशौचे मरणाशौचे च कार्यमित्याह मिताक्षरायां प्रजापतिः आशौ
चेत्तु समुत्पन्ने पुत्रजन्म यदा भवेत् तत्तु तात्कालिका [illegible] शुद्धिः पूर्वाशौचेन शुद्ध्यति केचित्तु मृताशौचस्य मध्ये
तु पुत्रजन्म यदा भवेत् आशौचापगमे कार्यं जातकर्म यथाविधीति स्मृतिसंग्रहोक्तेराशौचान्ते कार्यमित्या
हुः स्मृत्यर्थसारेपि विकल्प उक्तः मृदुध्रुवचरक्षिप्रभेष्वेषाम्भुदयेपि च गुरुशुक्रेण वा केन्द्रे जातकर्म च ना
म च मृगादित्रयेणमाह श्रीधरः रोहिण्युत्तरभं स्थिरं गिरिशं मूलेन्द्रोरगा दारुणं क्षिप्रं वाश्विदिनेशपुष्य
मनलेन्द्राग्नीतु साधारणं उग्रं पूर्वमघान्तिकं मृदु गतित्वाष्ट्रान्त्यमैत्रं चरं विष्णुस्वातिशतानोद्भिवस्वदितपः कुर्युः
स्वसंज्ञाफलं अत्र सर्वत्र जातनामकर्मादावुक्तकालातिक्रमेण तत्तदादिकृत्यं देशकालोपघाताद्यैःका

लमे

लातिक्रमणं यदि अन्नस्तगैंडूसितेन कार्यं चोत्तरायणे इति मदनरत्ने नारदोक्तेः वृहस्पतिरपि कुर्यौं विधि
ज्ञेन विधिच्छिन्नः प्रमादतः नक्षत्रतिथिलग्नानां विचार्य्यैव पुनः पुनः स्नानके संध्यादौ विशेषेव स्नानः अ
पजन्मनि दुष्टकाला नक्षत्रगंडांत ज्योतिर्निबंधे नारदः पूर्णानंदाख्ययोस्तिथ्योः संधिर्नाडीद्वयं तथा गंडं
तं मृत्युदं जन्मयात्रोद्वाहव्रतादिषु कुलीरसिंहयोः कीटचापयोर्मीनमेषयोः गंडांतमंतरालं स्याद्घटिका
र्द्धमृत्युप्रदं सार्पेंद्रपौष्णभेष्वंत्यपादोऽश्वमघाभसंधयः नंदग्रभेष्वाद्यपादा भानां गंडांतसंज्ञकाः रत्नमा
पं लायां पौषाश्विन्योः सार्पपित्र्यर्क्षयोश्च यच्च ज्येष्ठामूलयोरंतरालं तद्गंडांतं स्याच्चतुर्नाडिकं हि यात्राजन्मो वा
हकालेष्वनिष्टं रत्नसंग्रहे एणवनिताशिरे सर्वेषां गंडजातानां परित्यागो विधीयते वर्जयेद्दर्शनं यावत
च्छषण्मासिकं भवेत् तिथ्यर्क्षगंडे पितृमातृनाशो लग्नेतु संधौ न च यस्य नाशः सर्वेषु नो जीवति हंति वधू
र्जीवन्पुनः स्याद्बहुवारणाश्वः अथैषां दानं उत्तरगार्ग्ये तिथिगंडे त्वनड्वाहं नक्षत्रे धेनुरुच्यते कांच
नं लग्नगंडेतु गंडदोषो विनश्यति उत्तरे तिलपात्रं स्यात्पुष्ये गोदानमिष्यते अजाप्रदानं त्वाष्ट्रे स्यात्पूर्वा
षाढे च कांचनं उत्तरातिथ्ये चित्रासु पूर्वाषाढोद्भवस्य च कुर्याच्छांतिं प्रयत्नेन नक्षत्राकरजा बुधः
अथाश्लेषाफलं मूर्द्धास्य नेत्रगलकांसयुगं च बाहुहृज्जानुगुह्यपदमित्यादिदेहभागाः वाणाद्रिनेत्र
रुद्रभकृष्णुतिनागरुद्रषण्नंदपंचद्विरसः क्रमतो मृतिनाशः राज्यं पितृतो मातृनाशः कामक्रिया र

ज्यो॰ नि॰ सिं॰ ८

५

ति: पितृभक्तो बली स्वग्रः त्यागी भोगी धनी क्रमात् ज्येष्ठफलभुक्तं बुलयामल्ले ज्येष्ठा द्वौ जननी माता द्वितीये ज
ननी पिता तृतीये जननी भ्राता स्वयं माता चतुर्थके आत्मानं पंचमे हंति षष्ठे गोत्रक्षयो भवेत् सप्तमे चोभय
कुलं ज्येष्ठभ्रातरमष्टमे नवमे श्वशुरं हंति सर्वं हंति दशांशकः ॥ प्रथममूलफलं भल्लाटः अभुक्तमूलसंभ
वं परित्यजेत्तु बालकः समाष्टकं पिताथवा न तन्मुखं विलोकयेत् तदाद्यखादके पिता विपद्यते जनन्यथा
तृतीयके धनक्षयश्चतुर्थके ऽशुभावहः प्रतीपमंत्यपादतः फलं तदेवसार्पभे अभुक्तमूलमाह वृद्धवसि
ष्ठः ज्येष्ठांते घटिका चैका मूलादौ घटिकाद्वयं अभुक्तमूलमित्याहुः जातं तत्र विवर्जयेत् केचिज्ज्येष्ठांत्यमू
लाद्यं चपादं त्वभुक्तं मूलमाह कश्यपसंहितायां त्वन्यथोक्तं मूलाद्यपादजो हंति पितरं तु द्वितीयकः मातरं
स्वतृतीयो धनं सुहृदं चतुर्थजः फलं तदेवसार्पदे प्रतीपं त्वपादतः अथ मूलवृक्षः जपार्ल्विवामू
लस्तंभस्त्वचा शाखा पत्रं पुष्पफलं शिखा वेदा ४ स्तुभुत्रय ७ श्चैव दिश १० श्चैव सप्तवट्स्तथा नंदा बाणा
५ रसा ६ रुद्रा ११ मूलभेदाः प्रकीर्तिताः मूले नमूलनाशाय स्तंभे हनिधनक्षयः त्वचि भ्रातृविनाशाय
शाखा मातृविनाशकृत् पत्रे सपरिवारः स्यात् पुष्पेषु नृपवल्लभः फले बुलमते राज्यं शिखायामल्प
जीवितं अन्यत्र त्वन्यथोक्तं मूले सदा घटीषु हननं स्तंभे पसुखक्षयं च दिग्वधु विनाशनं च विटपे रु
द्वै हंता मातुलः पत्रे कैः सुकृनीत बाणकुसुमे मंत्री फले सागरे राजा वह्निशिखा स्वाल्पमायुरिति सन्मूलो

मूल

रामायनमः
८

घ्रियेस्यात्फलं भूपालवल्लभः वृषालिसिंहेषुघटे च मूलं यदि स्थितं युग्मतुलांगनांत्यो ।पाताललग्नेमेषध
नुःकुलीरनक्रेषु मर्त्ये स्थितिं संस्मरंति स्वर्गेमूले भवेद्राज्यं पाताले च धनागमं मृत्युलोके यदा मूलं तदा
शून्यं विनिर्दिशेत् वसिष्ठः नैर्ऋत्यभोद्भुतसुतः सुता वाद्यपादे श्वशुरं निहंति तदन्यपादे जनि
तो निहंति न स्वो क्रमेण हि भवेन्नु कलत्रं सुरेशतारा जनिता धवाग्रजं हि देवना राज्ञनितानु देवरं पुरंदर
दैवजनितः सुतस्तथा स्वस्याग्रजं हंति न पुत्रका यदि प्रयोगपारिजाते मूलजाश्वशुरं हंति व्यालजा च तदं
गना महेंद्रजाग्रं हंति देवरं तु हि देवजा नृसिंहप्रसादे धवाग्रजं हंति सुरेंद्रजाता तथैव पत्न्याः भ
गिनीं पुमांश्च हि देवजा देवरं माशु हन्याद्भार्यानुजा माशु हि हंति सूनुः पत्न्यग्रजामग्रजं वा हंति त्वेष्ट्र
दैवजः पुमान् तथा भार्यास्वसारं वा श्यालकं वा हि देवजः कन्यकादेवरं हंति विशाखांत्यसमुद्भवा ग्रा
द्यपादत्रये नैव ज्याद्यमेतु भवेत्पुमान् न हन्याद्देवरं कंन्या तुलामिश्राद्धि दैवजा न द्दंतांत्याद्भवा वर्ज्या
उश्चारपिकपुच्छवत् चित्राद्यर्धे पुष्यमध्ये द्विपादे पूर्वाषाढाधिष्ण्यपादे तृतीये जातः पुत्रश्चांत
राद्ये विधत्ते मातापित्रोर्मातुलं वालनाशं तद्द्विमासं चोत्तरादोषः पुष्ये चैव त्रिमासिकः पूर्वाषाढाद्य
मे मासि चित्राषाढमासिकं फलं नवमासं तथाश्लेषा मूले वाष्टकवर्षकं ज्येष्ठा पंचदशो मासिषु
जद्दर्शनवर्जितः वसिष्ठः व्यतीपाते गनाहानिस्यात्परिघे मृत्युमाप्नुयात् वैधृतौ पितृहानिःस्यान्न

ओम् नि० सिं० षष्ठे दौ वंधतांत्यजेत् मूले समूलनाशः स्यात् कुलनाशो ध्रुवं भवेत् विकृतांगे च हीने च संध्ययोरुभयोरपि पर्व

१०

ण्यपि प्रसूतौ च सर्वारिष्टभयप्रदः नक्षत्रसंदंतजातं अपालजातं तथैव च तस्माच्छांतिं प्रकुर्वीत ग्रह

णां क्रूरचेतसां गर्गः कृष्णा चतुर्दशी षोढा कुर्याद्दादौ शुभं स्मृतं द्वितीये पितरं हंति तृतीये हंति मातरं

चतुर्थे मातुलं हंति पंचमे वंशनाशनं षष्ठे तु धननाशः स्यादात्मनो वंशनाशनं देवकीर्तिः षष्ठ्येकाधि [illegible]

न जायंते जायंते दुहितरो ऽथवा पुत्राः पितरं तस्करा हंते यद्यप्येषां तिरस्[illegible]लास्यात् गर्गः एकस्मिन्नेव नक्ष

त्रे भ्रातोर्वा पितृपुत्रयोः प्रसूतिश्च तयोर्मृत्युर्भवेदेकस्य निश्चितं शौनकः ग्रहणे चंद्रसूर्यस्य प्रसूतिर्य

दि जायते व्याधिपीडा न दारिद्र्यं मादौ [illegible] दर्शनात् [illegible] संजायते यस्य तस्य मृत्युर्न संशयः शांति

दा रत्न तद्दोषे पतेत् रूपं स्वर्णेन प्रकल्पयेत् सूर्यग्रहे सूर्यरूपं हेमं चंद्रं तु राजतं राहुरूपं प्रकुर्वीत नागेन

व विचक्षणः नागः सीसं त्रयाणां चैव रूपाणां स्थापनं तत्र कारयेत् आकृष्णेनाप्यायस्व स्वर्भानो रिति यज्ञा

मंत्रः नक्षत्र देवतायास्तन्मंत्रेणास्य पूजयेत् यजेत्सूर्यं समिद्भिश्चार्कसंभवैः चंद्रग्रहे च पालाशैर्दूर्वाभिरा

हुमेव च समिद्भिर्ब्रह्मवृक्षस्य मेधाय जुहुयाद्बुधः आज्येन चरुणा चैव तिलैश्च जुहुयात्ततः पंचगव्यैः

पंचरत्नैः पंचत्वकांच पल्लवैः जलैरोषधिकल्कैश्चाभिषेकं समाचरेत् मंत्रैर्वारुणसंभूतैरापोहिष्ठा

द्विभिस्त्रिभिः इमं मे गंगे परतस्तत्वायामीति मंत्रकैः यजमानस्ततो दद्यादृत्विग्भ्यो प्रतिकृतित्रयं मात्स्ये रामायनमः

१०

7

अकालप्रसवानार्यः कालातीतः प्रजास्तथा विकृतप्रसवाश्चैव युग्मप्रसवकास्तथा हीनांगाश्चाधिकां
गाश्च जायंते यदि वा स्त्रियः पशवः पक्षिणश्चैव तथैव च सरीसृपाः विनाशं तस्य देशस्य कुलस्य विनिर्दि
शेत् निवासयेत्तां नगरात्तत्र शांतिं समाचरेत् विष्णुधर्मोत्तरे उपरि प्रथमं यस्य जायंते च पिशाचा द्विजाः
दंतैर्वा सह यस्य स्यात्तत्त्वभार्गवसत्तम द्वितीये च तृतीये च चतुर्थे पंचमे तथा यदा दंताश्च जायंते मा
से चैव महद्भयं मातरं पितरं वाथ खादेदात्मानमेव च गजवृषगतं बालं नौस्थं वास्थापये द्विजः
तदभावे तु धर्मज्ञ कांचनं चार्वौषधीः सर्वगंधैः बीजैः पुष्पैः फलैस्तथा पंचगव्येन रत्नैश्च पताकाभिश्च
भार्गव स्थालीपाकेन धातारं पूजयेत्तदनंतरं सप्ताहं चात्र कर्तव्यं तथा ब्राह्मणभोजनं भद्रासने
निवेश्यैनं मृद्भिर्मूलैः फलैस्तथा सर्वौषधैः सर्वगंधैः सर्वबीजैस्तथैव च स्नापयेत् पूजयेच्चात्र वह्नि
होमं समीरणं पर्वतांश्च तथा ख्यातान् देवदेवं च केशवं एतेषामेव जुहुयाद्धुतमग्नौ यथाविधि ब्रा
ह्मणानां तु दातव्या ततः संपूज्य दक्षिणा ब्रह्मयामले प्रथमं दंतनिर्भेदि रूर्द्ध्वं बलस्य चेद्भवेत् स्ने
हात्यमातुलस्यैह तदाप्रोक्ता महर्षिभिः सौवर्णे राजते वापि ताम्रकांस्यमयेऽथवा दध्योदनेन संपू
र्णं पात्रं दद्याच्छिशोः करे समंत्रं भाजनं दद्यात्वा संपन्नेपि तु मातुलः सालंकारं सवस्त्रं च शिशुं मत्त
स्य प्रसादरं ततः मंत्रः रत्नमांभागिनेयत्वं रत्नमे सकलं कुलं गृहीत्वा भाजनं सान्त्वं प्रसन्नो भव मे स

ॐम् नि०सि०दा ११

निर्विघ्नं कुरु कल्याणं निर्विघ्नो च त्वमानरं मध्यात्मानमाभिष्टायुर्जीवंजीवं मया सह ततोभिनंदयेद्विध

न् भगिनीं भगिनीपतिं ज्येष्ठान्श्रेष्ठान्गुरून्विप्रान्पवित्रानभिपूजयेत् एवं कृते तु विधाने तु विघ्नः

कोपि न जायते इति अथ त्रिकशांतिः शांतिसर्वस्वे सुतत्रये सुताचेत्तनये वा सुतो यदि मातापित्रोः

कुलस्यापि तदानिष्टं महद्भवेत् ज्येष्ठनाशो धनेहानिर्दुःखं वा सुमहद्भवेत् ॥ जातस्यैकादशाहे वा द्वा

दशाहे शुभे दिने आचार्यमृत्विजो वृत्वा ग्रहयज्ञपुरःसरं ब्रह्मविष्णुमहेशेंद्रप्रतिमास्वर्णेन कृत्वा पू

जयेद्धान्यराशिस्थकलशोपरिस्थापिताः पंचमे कलशे रुद्रं पूजयेद्रुद्रसंख्यया इंद्रसूक्तानि चत्वारि शां

तिसूक्तानि सर्वशः आचार्यो जुहुयात्तत्र समिदाज्यतिलांश्चरुं अष्टोत्तरसहस्रं वा शतं वा त्रिशतं तु

वा देवताभ्यश्च तत्वैकं द्विग्भ्यो ग्रहपुरःसरं ब्रह्मादिमंत्रैः रुद्रस्नपनं इंद्रमयामहे ततः स्विष्टकृतं हु

त्वा बलिं पूर्णाहुतिं ततः अभिषेकं कुटुंबस्य कृत्वाचार्यं प्रपूजयेत् हिरण्यं धेनुरेका च दत्त्वा ऋत्विजां दक्षि

णां ततः आज्यस्यावीक्षणं कृत्वा शांतिपाठं तु कारयेदिति अन्ये मूलादिरूक्षेषु शांत्यादिप्रयोगमपा

रिजाते मनु कृते शांतिरत्ने च द्रष्टव्यमिति अथ रायां मार्कंडेयः रक्षणीया निशा षष्ठी निशा तत्र वि

शेषतः रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः रा

त्रौ जागरणं कुर्युर्दशम्यां चैव सूतके व्यासः सूतिकावासनिलया जन्मदा नाम देवता तासां या

१८

गनिमित्तं तु भुक्तिजन्मानि कीर्तिता प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा त्रिष्वेतेषु प्रकुर्वीत पुत्रजन्मनि सूतकं अपरा
कैश्चाले कंन्याश्चतस्रो राकाद्या वा तथापि चैव पंचमी क्रीडनार्थी च बालानां षष्ठी च शिशुरक्षिणी स्वङ्गे तु पूजनीया वै
त्रैपक्षी त्वैर्द्विजातिभिः राकानुमतिः सिनीवाली कुहूरिति चतस्रः कन्याः इत्यर्थः अथ दत्तपुत्रप्रतिग्रहविधिः पारिजाते
शौनकः अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च वाससी कुंडले दत्वा उष्णीषं चांगुलीयकं बंधून्नेन संभोज्य ब्राह्म
णांश्च विशेषतः अग्न्याधानादि जं पुण्यं कृत्वा ज्योत्पवनांतकं दातुः समक्षं गत्वा तु पुत्रं देहीति याचयेत् दाने सम
र्थो दाता स्मै ये यज्ञेनेति पंचभिः देवस्य त्वेति मंत्रेण हस्ताभ्यां प्रतिगृह्य च अंगादंगेत्य एवं जप्त्वा आघ्राय शिशुं म
र्द्धनि गृहमध्ये तमाधाय चरुं कृत्वा विधानतः यस्त्वाहृदा मनसा चैव तुभ्यमग्ने चैकया सोमो ददद् इत्येताभि त्यृचं पं
चभिस्तथा स्विष्टकृदादिहोमं च कृत्वा शेषं समापयेत् ब्राह्मणानां सपिंडेषु कर्तव्यः पुत्रसंग्रहः तदभावे सपिंडे वा
अन्यत्र तु न कारयेत् मिताक्षरायां तु व्याहृतिराज्येन होमः उक्तः स च होमोत्तरं जलपूर्वकं देयः न वाङ्मात्रेण व्या
हृतिभिर्हुत्वा प्रतिगृह्णीयादिति वसिष्ठोक्तेः माता पिता वा दद्यातां यमद्भिः पुत्रमापदि सदृशं प्रीतिसंयुक्तं स ज्ञे
यो दत्रिमः सुतः इति मनूक्तेः तत्रैव वसिष्ठः न त्वेवैकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुरिति इदं
च भर्तृसत्त्वे अन्यथा दद्यात् माता पिता वा यं स पुत्रो दत्रिमः स्मृत इति व्यासवचोविरोधः स्यात् दानं प्र
तिग्रहोपलक्षणं यत्तु समंत्रकहोमस्य पुत्रप्रतिग्रहांगत्वात् व्याहृत्यादिमंत्रपाठे च स्त्रीशूद्रयोरधिकारात्

न

नस्त्रीपुत्रं दद्यात्प्रतिगृह्णी
याद्वा २

योर्हृतकः पुत्रो शूद्रविवेके ऽप्यधेदूरेणोक्तं वाचस्पतिमिश्रैरप्येवमाह तन्न भर्त्रनुज्ञया स्त्रियाऽपि प्रतिग्रहोक्तेः यद्यपि मे
धातिथिना भार्यात्वहेतुरूपे दत्तकत्वे होमसाध्यत्वमुक्तं स्त्रियाश्च होमासंभवस्तथापि व्रतादिवद्विप्रद्वारा होमादिकार
येदिति हरिनाथादयः सर्वं धनं त्वेष्येवं रावणशूद्रस्यापि स्त्रीशूद्राश्च सधर्मिण इति स्मृतेः अत एव शूद्रकर्तृकहो
मो विप्रद्वारेणैव पराशरेणोक्तः दक्षिणार्थं तु यो विप्रः शूद्रस्य जुहुयाद्धविः ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो
भवेत् अत्र माधवाचार्यैः यो विप्रः शूद्रदक्षिणामादायास्यैव दोषः शूद्रस्तु होमफलं लभतेऽवेति व्याचख्यौ दत्तके
विशेषः कालिकापुराणे पितृगोत्रेण यः पुत्रः संस्कृतः पृथिवीपते आचूडान्तं न पुत्रः स्यात्पुत्रतां याति चान्यतः
चूडोपायनसंस्कारा निजगोत्रेण वै कृताः दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ऊर्ध्वं तु पंचमाद्वर्षाद्दत्ता न
ग्रांशुना नृप गृहीत्वा पंचवर्षीयं पुत्रेष्टिं प्रथमं चरेदिति पंचमोर्ध्वं तु सद्दाने ष्ठोरेव दानं नान्यथा विक्रियैवेव
दानं च न नेयाः स्युरनिश्चयः दाराः पुत्राश्च सर्वस्वमात्मनैव तु योजयेदिति हेमाद्रिव्यासधृतदक्षादिवचना
त्याज्ञवल्क्यः स्वकुटुंबाविरोधेन देयं दारसुतादृते इति तदूर्ध्वं स्वदानानिषेधः पुत्रपदं तेन सर्वस्वदा
नेष्टः दारपुत्रदानं सिद्धं यत्तु षष्ठे विश्वजिदधिकरणे तत्र पुत्रादीनां स्वशब्दवाच्यत्वात् पुत्रत्वेन दानमाशंक्य
निरस्तं जन्यपुत्रस्य दानेनानिष्पत्तेः दासत्वेन दानं भवत्येव यथेष्टविनियोगार्हत्वस्यैव स्वत्वात् न च तत्र
स्वात्वहेतुनाम भावः अप्रतिषेधरूपत्वायत्तस्य तत्र सत्वात् पुत्रे स्वत्वाभावं वदन् शुनःशेपादिष्वोतनलिं

तूपरिष्ट

गविरोधात् क्रयविक्रयादिव्यवहारायोगात्स्वमूल्येणैवावस्तुतस्तु विश्वलितिनिस्वत्वाद्दस्यसकृत्प्रयुक्तस्यधनत्वयैका-
र्थबोधकत्वमप्युपपद्यते नेत्याद्यादि परत्वमित्येवं मूल्यपुक्तिः योऽपि न हि गृभायारणः सुशेवोऽन्योदर्यो मनसामं
तवा उ इति श्रुतौ दत्तकनिषेधः सोऽप्यौरसाभिप्रायार्थः अन्यथा श्रुतः क्रीतादिप्रतिग्रहश्रौतलिंगविरोधा
पत्तेः उपेयात्तवपुत्राणामित्युक्तेः इदं च श्रौतं लिंगं स्वयंदत्तक्रीतयत्न दत्तकपरं शाह्माद्दशविधपुत्रमध्ये दत्ता
त्मानु स्वयंदत्तः क्रीतस्थानाभ्यां विक्रीत इति याज्ञवल्क्येन तयोर्दत्तकाद्भेदउक्तः नयोश्रवत्तौरसेतरेषां त
पुत्रत्वेन परिगृह इति कलौ निषेधात् तेन न संस्कारो न च दत्तको न भवत्येवेति सिद्धं अथ यमयोः संस
कारक्रमार्थं ज्येष्ठकनिष्ठभाव उच्यते मनुः पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायां च पूर्वजः कथं तयोर्विभा
गः स्यादिति चेत्संशयो भवेत् सह त्वाशास्त्रीप्रजातानां पुत्राणामविशेषतः न मातृतो ज्यैष्ठ्यमस्ति जन्मतो
ज्येष्ठ्यमुच्यते तेन कनिष्ठायां पूर्वजात एव ज्येष्ठः न ज्येष्ठायां पश्चाज्जात इत्यर्थः स एव श्राद्धाधिकारी
जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतं यस्य जातस्य यमयोः पश्यन्ति प्रथमं मुखं संतानः पितरश्चै
व तस्मिन् ज्येष्ठ्यं प्रतिष्ठितं भागवतेतु नैनदाभवनो गर्भौ सूतिर्वैशाविपर्ययादित्युक्तेः पश्चादुत्पन्न-
स्य ज्येष्ठ्यमुक्तं अत्र देशाचारतो व्यवस्था पूर्वमेव तत्प्रयुक्तां गर्भाष्टमे इत्यादौ विशेषनिर्देश एव गर्भग्र
हणेनान्यत्र अन्यथा तद्वैयर्थ्यात् अथ स्वनिकास्नाने ज्योतिषि करेंदुभाग्यानिलवासवेन्यमैत्रेध्वा

यमयोर्ज्येष्ठ्यं वा गर्भेषु जन्मतो ज्येष्ठता मता। देवलः

ओम.नि.सिं.
१२

श्विधुवमेथान्हि पुंसां तिथावरिक्ते शुभमासमलेतिप्रसूतिकास्नानविधानमुक्तं नीद्रा: अथ नामकर्म मदनरत्ने वृहस्प
ति: द्वादशे दशमे वापि जन्मतोपि त्रयोदशे षोडशे विंशतौ चैव द्वात्रिंशे वर्णत: क्रमात् याज्ञवल्क्य: अह
न्येकादशे नाम हेमाद्रौ भविष्ये नामधेयं दशम्यां तु द्वादश्यां मासिकेन च अष्टादशेहनि तथा वदंत्य
न्ये मनीषिण: दशम्यामतीतायामिति ज्ञेयं आशौचापगमे नामधेयमिति विज्ञानेश्वर: गृह्यपरिशिष्टे जन
नाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामकरणं व्युष्टेतीते ज्योतिर्निबंधे गर्ग: अमासंक्रांतविष्ट्यादौ
प्राप्तकालेपि नाचरेत् श्रीधर: मित्रादित्यमघोत्तराशतभिषक्स्वातिधनिष्ठाच्युतभाजेशाश्वि शशांक
पौष्णदिनकृत्पुष्येषु राशौ स्थिरे छिद्रां पंचदशीं विलंघ्य नवमीं कुष्टे मेभार्गवज्ञाचार्यामृतपादभाग
दिवसे नामानि कुर्याच्छिशो: मनु: नामधेयं ब्राह्मणस्य स्यान्मंगल्यं क्षत्रियस्य तु वैश्यस्य धनसंयुक्तं शूद्र
स्य तु जुगुप्सितं मदनरत्ने नारदीये सत्तकांते नामकर्म विधेयं स्वकुलोचितं नामपूर्वं तु मासस्य मंगलं
सुसमाहितै: तत्रैव गार्ग्य: मासनामगुरो नाम दद्याद्बालस्य वै पिता कृष्णोनंतोच्युतश्चक्री वैकुंठोथ
जनार्दन: उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरि: योगीश: पुंडरीकाक्षो मासनामान्यनुक्रमात् अ
त्र मार्गशीर्षादि: चैत्रादयश्चक्रिमदनरत्ने तन्मासनाम प्रथमं दद्यात्संबुध्य चैव हि देवतानपग
जाम्भानां वत्राणां वापि कूपयो: सर्वापणानां पण्यानां चित्रार्थयोषितां नराणां काव्यानां च कवीनां च

रामायनम:
१२